# सूर्य अष्टोत्तर शतनामावली स्तोत्रम्

सूर्योऽर्यमा भगस्त्वष्टा पूषार्कः सविता रविः ।

गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ।।1।।

पृथिव्यापश्च तेजश्च खं वयुश्च परायणम ।

सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च ।।2।।

इन्द्रो विश्वस्वान दीप्तांशुः शुचिः शौरिः शनैश्चरः ।

ब्रह्मा विष्णुश्च रुद्रश्च स्कन्दो वरुणो यमः ।।3।।

वैद्युतो जाठरश्चाग्निरैन्धनस्तेजसां पतिः ।

धर्मध्वजो वेदकर्ता वेदाङ्गो वेदवाहनः ।।4।।

कृतं तत्र द्वापरश्च कलिः सर्वमलाश्रयः ।

कला काष्ठा मुहूर्ताश्च क्षपा यामस्तया क्षणः ।।5।।

संवत्सरकरोऽश्वत्थः कालचक्रो विभावसुः ।

पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः ।।6।।

कालाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः ।

वरुण सागरोऽशुश्च जीमूतो जीवनोऽरिहा ।।7।।

भूताश्रयो भूतपतिः सर्वलोकनमस्कृतः ।

स्रष्टा संवर्तको वह्नि सर्वलोकनमस्कृतः ।।8।।

अनन्त कपिलो भानुः कामदः सर्वतो मुखः ।

जयो विशालो वरदः सर्वधातुनिषेचिता ।।9।।

मनः सुपर्णो भूतादिः शीघ्रगः प्राणधारकः ।

धन्वन्तरिर्धूमकेतुरादिदेवोऽअदितेः सुतः ।।10।।

द्वादशात्मारविन्दाक्षः पिता माता पितामहः ।

स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम ।।11।।

देहकर्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः ।

चराचरात्मा सूक्ष्मात्मा मैत्रेय करुणान्वितः ।।12।।

एतद वै कीर्तनीयस्य सूर्यस्यामिततेजसः ।

नामाष्टकशतकं चेदं प्रोक्तमेतत स्वयंभुवा ।।13।।